दमितः । इत्यमरः । २ । ७ । ४३ ॥ (यथा, महाभारते । १ । २२२ । ४६ ।
"तथैवाश्वतरीणाञ्च दान्तानां वातरंहसाम् ॥"
दन्तेन निर्वृत्तम् । दन्त+"तेन निर्वृत्तम् ।" ४ । २ । ६८ । इति अण् । दन्तनिर्म्मितम् । यथा, महाभारते । ५ । ४६ । ५ ।
"रुचिरैरासनैस्तीर्णां काञ्चनैर्दारवैरपि । अश्मसारमयैर्दान्तैः स्वास्तीर्णैः सोत्तरच्छदैः ॥")
दाता । इति संक्षिप्तसारे उणादिवृत्तिः ॥ पुं, दमनकवृक्षः । शिखितवृक्षः । इति राजनिर्घण्टः ॥ (विदर्भराजपुत्त्रविशेषः । यथा, महाभारते । ३ । ५३ । ८—९ ।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ । कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥ दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ॥"
स्त्री, अप्सरोविशेषः । यथा, महाभारते । १३ । १९ । ४५ ।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च ॥")

दान्तिः, स्त्री, (दम+क्तिन् । "अनुनासिकस्येति ।" ६ । ४ । १५ । इति दीर्घः ।) तपःक्लेशसहिष्णुता । तत्पर्य्यायः । दमथुः २ दमः ३ । इत्यमरः । ३ । २ । ३ ॥

दापितः, त्रि, (दाप्यते स्म इति । दा+णिच्+कर्म्मणि क्तः ।) साधितः । इत्यमरः । ३।१।४०॥ धर्म्मादिना आयत्तीकृतः । इति भरतः ॥ धुती इति ख्यातं यस्मै दत्तं स इति रमानाथः ॥ दण्डितः । इति विद्याविनोदः ॥ शोधितद्रव्यम् । इति नयनानन्दः ॥ दायित इति पाठोऽपि । इति कालिङ्गपुरुषोत्तमौ ॥

दाम, [न्] क्ली स्त्री, (दीयते इति । दा दाने दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४५ । इति मनिन् ।) यत्रैकस्मिन् बहुप्रग्रहयुक्ते अनेकगावो बध्यन्ते तत् । दाडनि इति दोँका इति च भाषा । तत्पर्य्यायः । सन्दानम् २ । इत्यमरः । २ । ९ । ७३ ॥ रज्जुः । इति दामोदरदर्शनात् ॥ (यथा, भागवते । १ । ८ । ३१ ।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति ॥"
माला । यथा, माघे । ४ । ५० ।
"स्तवकमलघु विलम्बिपिच्छदाम्नः
शिखरशिखाः शिखिशेखरानमुष्य ॥"
दातरि, त्रि । यथा, ऋग्वेदे । ६ । ४४ । २ ।
"यः शग्मस्तुविशग्म ते रायो दामा मतीनाम् ॥"
"रायो धनस्य दामा दाता भवति ।" इति तद्भाष्ये सायनः ॥)

दामनपत्त्रं, [न] क्ली, (दमनो दमनवृक्षस्येदमित्यणप्रत्यये दामनं तद्भञ्जनसम्बन्धि पत्त्रं यस्मिन् ।) दमनभञ्जनतिथिः । सा चैत्रशुक्लचतुर्द्दशी । इति तिथ्यादितत्त्वम् ॥

दामनी, स्त्री, (दामैव । दामन्+स्वार्थे प्रज्ञादित्वात् अण् । "अन् ।" ६ । ४ । १६७ । इति प्रकृतिभावः । "टिड्ढेति ।" ४ । १ । १५ । इति ङीप् ।) पशुबन्धनरज्जुः । तत्पर्य्यायः । पशुरज्जुः २ । इत्यमरः । २ । ९ । ७३ ॥ (यथा, हरिवंशे । ६५ । २४ ।
"कोलैरारोप्यमाणैश्च दामनीपाशपाशितैः ॥")

दामलिप्तं, क्ली, तमोलिप्तदेशः । इति हेमचन्द्रः । ४ । ४५ ॥

दामा, स्त्री, (दामन्+"डाबुभाभ्यामन्यतरस्याम् ।" ४ । १ । १३ । इति पक्षे डाप् ।) दाम । इति भरतः ॥

दामाञ्चनं, क्ली, (दामाञ्चलम् । पृषोदरादित्वात् लस्य नः ।) अश्वादेः पादबन्धनरज्जुः । इति हेमचन्द्रः । ४ । ३१७ ॥

दामाञ्चलं, क्ली, (दाम्नः अञ्चलमिव ।) एकप्रग्रहाङ्घ्रिबन्धः । अश्वादिपादबन्धनरज्जुः । इति हारावली । ६१ ॥ (यथा, माघे । ५ । ६१ ।
"सस्तुः खरीषपरिचारकवार्य्यमाणा
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥")

दामोदरः, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा मतिर्या तया गम्यते इति दामोदरः । 'दाम्ना-दामोदरं विदुः ।' इति भगवद्वचनात् । यशोदया दाम्नोदरे बद्ध इति वा दामोदरः ।
'दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः ॥'
इति वा ।" इति विष्णुसहस्रनामभाष्ये शङ्करः ॥ ५३ ॥ तथा, महाभारते । ५ । ७० । ८ ।
"दैवानां स्वप्रकाशत्वात् दमाद्दामोदरो विभुः ॥")
विष्णुः । इत्यमरः । १ । १ । १८ ॥ (दाम रज्जुरुदरे यस्य । श्रीकृष्णः । यथा, महाभारते । १ । १९० । १९ ।
"दामोदरो भ्रातरमुग्रवीर्य्यं
हलायुधं वाक्यमिदं बभाषे ॥"
यशोदयासौ उदरदेशे दाम्ना बद्ध आसीत् अतोऽस्य तथा नाम । यथा, हरिवंशे । ६३।१४,२६ ।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धदुलूखले ।
यदि शक्तोऽसि गच्छेति तमुक्त्वा कर्म्म साकरोत् ॥"
"स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् ।
गोष्ठे दामोदर इति गोपीभिः परिगीयते ॥")
भूतार्हद्विशेषः । इति हेमचन्द्रः । २ । १३० ॥ (शालग्राममूर्त्तिविशेषः । तल्लक्षणं यथा, पद्मपुराणे ।
"स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत्तु सः ।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा ॥"
अस्य अन्यद्विवरणन्तु शालग्रामशब्दे द्रष्टव्यम् ॥ * ॥ काश्मीरस्य नृपविशेषः । यथा, राजतरङ्गिण्याम् । १ । ६४ ।
"गतिं प्रवीरसुलभां तस्मिन् सुचरिते गते ।
श्रीमान् दामोदरो नाम तत्सूनुरभजत् क्षितिम् ॥")

दाम्भिकः, पुं स्त्री, (दम्भेन चरतीति । दम्भ+"चरति ।" ४ । ४ । ८ । इति ठक् ।) बकपक्षी । इति राजनिर्घण्टः ॥ दम्भयुक्ते, त्रि ॥ (यथा, मनुः । ३ । १५९ ।
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥")

दाय, ऋ ङ दाने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अददायत् । ङ, दायते । इति दुर्गादासः ॥

दायः, पुं, (दीयते इति । दा दाने+घञ् । "आतो युक् चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।) यौतुकादिदेयधनम् । (यथा, महाभारते । २ । ५१ । १ ।
"दायन्तु विविधं तस्मै शृणु मे गदतोऽनघ ।
यज्ञार्थं राजभिर्दत्तं महान्तं धनसञ्चयम् ॥")
कन्यादानकाले जामात्रादिभ्यो व्रतभिक्षादौ ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत् । इति भरतः ॥ तत्पर्य्यायः । हरणम् २ । इत्यमरः । २ । ८ । २८ ॥ सोल्लुण्ठभाषणम् । विभक्तव्यपितृद्रव्यम् । (यथा, मनुः । ९ । १६४ ।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ॥"
विभागार्हधनमात्रम् । यथा, तत्रैव । ९ । ७७ ।
"संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्द्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥"
दा दाने+भावे घञ् ।) दानम् । इति मेदिनी । ये, ३० ॥ (यथा, मनुः । ८ । १९९ ।
"अस्वामिना कृतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥")
स्थानम् । (दो छेदे+घञ् ।) खण्डनम् । इति शब्दरत्नावली ॥ लयः । इत्यजयपालः ॥ (ददातीति । दा+"श्याद्व्यधेति ।" ३ । १ । १४१ । इति णः । दातरि, त्रि । इति व्याकरणम् ॥)

दायकः, त्रि, (ददातीति । दा+ण्वुल् ।) दाता । यथा । हतारिगतिदायक इति भक्तिरसामृतसिन्धुः ॥ (यथाच महाभारते । ३ । १८३ । ३३ ।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः ॥")

दायबन्धुः, पुं, (दाये बन्धुः ।) भ्राता । इति शब्दरत्नावली ॥

दायभागः, पुं, (दायस्य भागः ।) सम्बन्धिमात्रेण सम्बन्धिधनविभागः । पूर्व्वद्रव्यस्वामिसम्बन्धाधीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढ़ो दायशब्दस्तस्य विभागः । एकदेशगतस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतयाव्यवस्थितस्य गुटिकापातादिना व्यञ्जनम् । अथवा विशेषेण भजनं स्वत्वज्ञापनं वा । यत्र चैकं दासीगवादिकं बहुसाधारणं तत्रापि तत्तत्कालविशेषवहनदोहनफलेन स्वत्वं व्यज्यते ॥ * ॥ अथ दायाधिकारक्रमे पुंधनाधिकारिणः । तत्रादौ मृतधने औरसपुत्त्रस्याधिकारः । तदभावे पौत्त्रस्य । तदभावे प्रपौत्त्रस्य । मृतपितृकपौत्त्रमृतपितामहकप्रपौत्त्रयोः पुत्त्रेण सह तुल्याधिकारः । एषामभावे पत्नी धनाधिकारिणी । तत्रायं विशेषः पत्नी धनं भुञ्जीत